# उगादिमहोत्सवः

**दिनाङ्कः - १३.०४.२०२१**

**प्लवनामकसंवत्सरस्य शुभाशयाः !**

राष्ट्रियसंस्कृतविश्वविद्यायेन १३.०.४.२०२१ दिनाङ्के "उगादिमहोत्सवः" इति नूतनसंवत्सरस्य आचरणं व्यधायि। प्लवः नाम नूतनसंवत्सरः समारब्धः। अस्मिन् महोत्सवे विविधाः संगीतकार्यक्रमाः विश्वविद्यालयस्य अभिनयकलाविभागेन समायोज्यन्त। विश्वविद्यालयस्य संगीतविषयमधीयानाः छात्राः बाह्यास्संगीतविद्वांसश्च विविधान्कार्यक्रमान्अकार्षुः।उगादिमहोत्सवस्यउद्घाटनकार्यक्रमेतिरुपतिस्थश्रीवेङ्कटेश्वरवैद्यकीयविज्ञानसंस्थायाः निदेशिकाः कुलपतयश्च डा. बि. वेङ्गम्मामहोदयाः मुख्यातिथिरूपेण उपस्थिता आसन्। कार्यक्रमस्य आध्यक्ष्यं विश्वविद्यालयस्य मान्याः कुलपतयः आचार्याः वि. मुरलीधरशर्ममहोदयाः अकुर्वन्। साहित्यविभागस्य वरिष्ठाः आचार्याः जि.एस्.आर्.कृष्णमूर्तिमहाभागाः सविस्तरं सप्रमाणं नवीनवत्सरस्य पञ्चाङ्गश्रवणम् अकारयन्। कार्यक्रमस्य निर्वहणम् अभिनयकलाविभागस्य सहायकाचार्याः डा. वैजर्सुबालसुब्रह्मण्यंमहोदैयाः अकृषत। वैदिककृषिविषये वेदविभागस्य विद्यार्थी श्रीमान् कौटिल्यकृष्णः स्वकीयानुभवं प्राकटयत्। विश्वविद्यालयस्य छात्राः अध्यापकाः शिक्षकसहयोगिकर्मकराश्च कार्यक्रमेऽस्मिन् समुपस्थिता आसन्। महता उत्साहेन अयं कार्यक्रमः समायोज्यत।





भाषमाणाः मुख्यातिथयः डा. बि. वेङ्गम्मामहोदयाः मान्याः कुलपतयः वि. मुरलीधरशर्ममहोदयाश्च। पञ्चाङ्गवाचनं कृतवन्तः आचार्याः जि.एस्.आर्.के. महोदयाः।



